# ॥ सभा-प्रारम्भ-प्रार्थना ॥

दक्षिणास्यसमारम्भा शङ्कराचार्यमध्यमा ।
अस्मदाचार्यपर्यन्ता स्मर्या गुरुपरम्परा ॥ १ ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करँल्लोकशङ्करम् ॥ २ ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ ३ ॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥ ४ ॥

परिज्ञानाश्रम श्रीगुरुशङ्कर परिज्ञानाश्रम शङ्करसद्गुरु ।
केशव वामन कृष्ण पाण्डुरङ्ग आनन्द परिज्ञानगुरु ।
सद्योजात शङ्करसद्गुरु ॥ ५ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परब्रह्म तस्मै श्रीगुरुवे नमः ॥ ६ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै ॥
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ७ ॥